॥श्रिगणेशायनमः॥श्रिसरस्वत्यैनमः॥श्रिगुरुभ्यो नमः॥श्रिनाथ॥पार्व
त्युवाच॥मृत्युकालेजगंनाथ काशिपूर्योहिप्राणिनां॥उपदेशंकथं
तेषांतन्मब्रूहिमहेश्वरः॥१॥ईश्वरोवाच॥ओंकारंबिंदुसंयुक्तंनित्यं
ध्यायंतियोगिनः॥अस्मिन्मध्यस्थितंतत्वंदर्शयंतिजगद्गुरुं॥२
ओमित्येवपरंब्रह्मसर्वानुग्रहकारकं॥आब्रह्मस्तंबपर्यंतंसर्वानुग्रहका
रणं॥३॥प्रथमंतारकंज्ञात्वाद्वितियंदंडमेवच॥तृतीयं
कुंडलाकारंचतुर्थमर्धचंद्रकं॥४॥पंचमंबिंदुसंकाशंप्रणवःपंच
देवता॥वेदगर्भसमुद्भूतमयंदेवोनिरंजनः॥५॥तारकंचत्रिधा
ज्ञातंदंडकंविद्धिरुच्यते॥कुंडलोहितथास्त्रोअर्धचंद्रंसइश्वरः॥
॥६॥बिंदुसदाशिवोसाक्षात्प्रणवःपंचदेवता॥निरंजनस्तथा ॥७॥

तीतोउत्पत्तिस्थितिकारणं॥७॥ब्रह्मणंत्रिकुरंस्थानं॥अकाराकारसंज्ञी
कं॥व्यक्तवैखरीमवस्थातुंजाग्रतीस्थूलदेहकं॥८॥ह्रस्वमात्रात्मि
कंऋग्वेदोरजोगुणप्रकित्तिता॥एतत्तारकविज्ञेयंरक्तपंकजमध्य
गं॥९॥विष्णुनाश्रीहरुस्थानं॥उकाराकारसंस्थितंदीर्घमात्रा
मध्यतावाचालिंगदेहःस्तथैवच॥१०॥एतदंडकविज्ञेयंश्वे
तपंकजमध्यगं॥स्वप्नावस्थायजुर्वेदोगुणसत्वप्रतिष्ठितं॥
॥११॥रुद्रस्थानस्यंकारंमकाराकारसंस्थितंप्लुतमात्रादिवा
स्तव्यंतमोगुणप्रकीर्तितं॥१२॥कारणंदेहसंज्ञोतंपश्यंति
वाक्प्रतिष्ठितं॥सुषुप्तावस्थयायुक्तंसामवेदःस्तथैवच॥१३॥

MEMORIAL

एतत्कुंडत्रयंविद्यात्संश्यामपंकजमध्यगं॥सोमेश्वरस्यस्थानस्य
प्रोढपीठतिनिर्गतं॥१४॥पुण्यगीयर्द्धिमात्राचपरावाचा
सदैवहि।तयावस्थातथादेहं।माहाकारणमुच्यते॥१५॥अथ
वेणवेदयुक्तंदेवतंइश्वरमहत्॥अर्द्धचंद्रमितिप्रोक्तंनीत
पितादिपंकजं॥१६॥सदाशिवस्यस्थानस्यभ्रमरीगुंफयानिधा
परात्परवाक्सूक्ष्मदिहैकैवल्यंज्ञानदेहकं॥१७॥एतद्बिंदुमि
तिप्रोक्तंपितपंकजमध्यगं।तारकंचनवेद्भूमिंडकंजलमु
च्यते॥१८॥कुंडत्र्यंचतथातेजस्तदर्धचंद्रंचमारुतः॥बिंदु
श्चैवतथाकाशेप्रणवापंचनुतनि॥१९॥मत्युस्थितिप्रसर्जं
त्वंसूर्यचंद्रोतरंतरः।तारकंचनवेत्पूर्वदंडकंपश्चिमस्तथा॥२॥
॥२०॥

कुंडत्र्यंदक्षिणेनागेअर्द्धचंद्रंसमोत्तरंबिंदुचोर्ध्वदिशाप्रोक्तप्र
णवोपंचनिर्दिशः॥२१॥एतेहितदेवात्मानंविज्ञातेचविचक्ष
णः॥नैर्ऋत्यांतारकाकारंइशानंदंडकोचते॥२२॥कुंडत्र्याग्नि
दिशाकश्चवायव्यांअर्द्धचंद्रकं।बिंदुश्चार्द्धदिशाप्रोक्तंप्रणवो
पंचदिग्विधाः॥२३॥सर्वाकारमित्युक्तंतेसर्वगंसर्वतोमुखं
तारकंसद्योजातंचयंवामदंडंकंतथा॥२४॥कुंडत्र्योतत्पु
रुषायइशान्येअर्द्धचंद्रकं॥अघोरेभ्योबिंदुमितिप्रणवो
पंचनिर्मुखः॥२५॥विश्वाद्यसमाइत्यविश्वनागेपरायणः॥तारकं
चरुग्वेदोयंयजुर्वेहिदंडकं।कुंडत्र्यासामवेदोयंअर्धचंद्रोथर्वणः॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

बिंदुश्चसूक्ष्मवेदोयंप्रणवोवेदबिजकं॥२७॥अक्रुरोश्चाक्रुरोदेवकुटस्था
त्मस्यकुत्रकं।अर्धशून्यंतारकंचाकुर्धशुन्यंचदंडकं॥२८॥कुत्र्येंड
मध्यशुन्यंचचतुर्थेअर्धचंद्रकं॥बिंदुश्चेवगोचरंचाप्रणवोविश्व
तोमुखः॥२९॥शुन्यातितापरातपराअक्रुरंब्रह्मउच्यते॥प्रणवं
पररुपोयंकारणब्रह्मधारणं॥३०॥एवंब्रह्मात्मसंकाशंवर्द्धना
यजगोद्भवं॥प्रथमंतारकंब्रह्मद्वितियंदंडरुपकं॥३१॥तृतीय
कुंडलाकारंचतुर्थमर्धचंद्रकं॥पंचमंबिंदुसंकाशंप्रणवरुपं
चरुपकं॥३२॥अव्ययंमद्भूतंब्रह्मसहजाव्यक्तरुपजां।अव्य व
उद्भवाकरांश्चार्कशंमारुतस्तथा॥३३॥मारुतोद्भायतेतेजा।ते
जसापस्तथैवचआपश्याद्भायतेपृथ्वीपृथ्विविश्वंचजायते॥३४॥३॥

विश्वंतंब्रह्मज्ञातव्यंसाक्रुरंनाक्रुरोममी।एवंब्रह्मजगद्धासंनतोयस्तु
मानवा॥३५॥सज्ञातासर्वमाचार्यसिबाह्याभ्यंतरोदितं।दत्ता
त्रेयपरंब्रह्मअखंडमव्यवस्थितः॥३६॥एतावदिक्रितालोको
सर्वसंदेहवर्जिता॥दिक्षाब्रह्मस्वरुपेण।तत्वज्ञानेव्यवस्थि
तं॥३७॥दृश्यतादृश्यमात्मानंसच्चब्रह्मसनातनं॥पार्वत्युवाच॥
कथंमात्राकथंदेवोकथंवर्णनवरः प्रभो॥३८॥एथकूएथ
कमात्रकायांकेकेवर्णाःप्रतिष्ठिताः॥ईश्वरोवाच॥तारकंमू
लभूतस्यअकारारुंचमात्रकं॥३९॥ब्रह्मारुंदेवतंज्ञात्वारक्त
वर्णंविराजितं।प्रथकवर्णंतथादेविरक्तपितंसुशोभितं॥
॥४०॥त्रयंचाअर्द्धस्वहस्तंचप्रमाणंदेहलक्षणं॥दंडकंप्रथमं

द्वितियंज्ञात्वाउकारात्कंचमात्रकं॥७॥विष्णुदेवतमाख्यातं
श्वेतवर्णंविराजितं॥एथकवर्णंतथादेविश्वेतकबुरराजितं
॥७२॥अंगुष्टपर्वहस्तंचप्रमाणंदेहलक्षणं।तृतीयंचैवकुंडल्यं।मका
रास्यंचमात्रकं॥७३॥रुद्रदेवतमाख्यातंश्यामवर्णंविराजितं॥
एथकवर्णंपंचकंचराजतेपंचनौतिकं॥तेवर्णंशामगर्भस्थाज्ञात
व्याश्चमनिषानीः॥७॥पर्वार्धंचस्वहस्तंचप्रमाणंदेहलक्षणं।चतु
र्थंमर्धचंद्रंचउकारास्यंत्रमात्रकं॥इश्वरंदेवतंज्ञात्वानीलवर्ण
विराजितं॥२॥एथकवर्णंतृतीयंचनीलंचसुनीलंतथा॥७७॥
पितंचतृतीयंवर्णं।शुद्धश्वेतंचतुर्थकं।नीलगर्भस्यमध्यस्थंवर्णत्रय
मुदाहृतं॥७५॥मसुरामात्रप्रमाणंलोहितंदेहलक्षणं पंचमंबिं ॥७॥

दुसंकाशंरेफकारास्यंचमात्रकं॥७६॥देवोःसदाशिवोज्ञात्वा
पीतवर्णंत्यनुक्रमात्॥एथकवर्णंनतुतंत्रा।शुद्धपितंवदिपवत्॥
॥७७॥ईशतादृश्यमात्मानं।सवब्रह्मसनातनं॥पार्वत्युवाच॥प्रमाणं
नभवत्येवकैवल्यंज्ञानदेहकं।इदंसर्वशिरोधितेशिखाकवलराजितं
च ॥७८॥पितशिबिंदुमात्रांब्रह्मसायुज्यतारकं।बिंदुसाश्रगर्भस्यमध्य
स्थंशुध्यस्वेतंसुलक्षणं॥७९॥सोहंमात्रामुख्यबिजंसर्वंतिगर्भ
चारिणं॥सोहंबिजस्यमध्यस्थंशिरोमपरंमहत्॥८०॥सोहंरूप
मीदंज्ञात्वाअतऊर्धंनकिंचन॥पार्वत्युवाच॥सोहंतारकब्रह्मंवरा
ममंत्रवरप्रभो।एतत्छ्रवणमात्रेणकृतकृत्योस्मिसर्वदा॥८१॥

ईश्वरोवाच॥नदेयंयस्यकस्यापि।प्राणकंठगतायदि।देयंसद्भक्तियुक्तो
यशांतायसमचेतसे॥५२॥गुरुभक्तिरतानित्यंविरक्तायसमाहि
ताः॥भक्तिज्ञानविरक्तिश्चइतिशिष्यसनातनं॥५३॥तस्यदेयमि
देवेशीमन्यथानप्रकाशतेप्रकाशयेपिदुष्टेपिनिःफलंभवेयु
तेद्रुवं॥५४॥अथमंत्रंप्रवक्ष्यामिमोक्षदःसर्वदेहिनां।ओंहं
देवितत्वसोहंइत्यादौपाठयेत्सुधि॥५५॥पश्चाच्छ्रीरामरामे
यनमःश्चैवाग्निनीश्चितं॥एवंचतारकंब्रह्मरामंत्रमिदं
स्मृतं॥५६॥अस्मिन्मंत्रेधिकारश्चसर्वेषांचनसंशयः ब्राह्म
णःक्षत्रियोवैश्यःशूद्रोवांत्यजोपिवा॥षट्दर्शनाश्चमार्गेषु॥५७॥



अदर्श्यन्यस्तथैवच॥वर्णेषुवर्णहिनेषु।चांडालादिषुनिश्चि
तं॥५८॥अयंमंत्राधिकारिणोसर्वत्रास्यनसंशयः॥ब्राह्मणोक्ष
त्रियोवैश्यांशूद्रोवाअंत्यजोपिवा॥५९॥यस्यदेहेवसेच्छ्रद्धा तस्य
देयंसुज्ञानने॥मंत्रदेयंप्रथमतः।क्षेत्रशुध्यर्थनिश्चितं॥६०॥
सप्तकोटिमहामंत्राह्यसंकाह्यमंत्रकाः॥एताश्चसकलामंत्रा
नवंतांश्चब्रुवामहे॥६१॥सर्वमंत्राधिकंश्रेष्ठपंचायतनमंत्रकं।
गजाननोधिकतरसूर्यविद्याविनयशिष्यते॥६२॥सूर्यविद्या
धिकादेविविष्णुविद्याविशिष्यते॥विष्णुविद्याधिकंश्रेष्ठंशां
नवंशिवविद्यया॥६३॥शांनवाधिकादेवेशि।शक्तिविद्याप
रंस्मृतं॥

शक्ताश्रेष्ठंश्रीविद्याचएतश्रेष्ठंनविद्यते॥६३॥सर्वविद्याशिरोधिते।श्रिविद्या
हिनसंशयः॥तस्मात्सर्वत्रविद्यायां।श्रीविद्याशिरसिप्रिये॥६४॥राज
राजेश्वरिविद्या।एतन्मुख्याकदाचन॥सत्यंसत्यंपुनःसत्यं।सत्यंसत्यं
पुनःपुनः॥६५॥सत्यंसत्यंपुनःसत्यंत्रिवचःकथयामहं॥अस्याधि
काराद्युवरिताःएतस्मिन्कथीतातव॥६६॥एतावद्ध्यानकस्यापि
निश्चितंकथितंशिवे।नाशंमेहिपुनर्नाषवाक्यंनिश्चयम्ब्रुवाम्यहं॥६७॥
अस्यमंत्रस्यदेवेशिनेवन्यासंषडंगकं।नैवध्यानंनूतशुद्धिंप्राणप्र
तिष्ठावतु॥६८॥नकवचंनचस्तोत्रंनचदिक्बंधनादिकं॥सि
द्धिसाध्यसुसिधारिघटितार्थंनकिंचनः॥६९॥नयंत्रपुजनंचैव॥७०॥

पथ्यत्यापदृलादिकं॥सहस्रंमजपापिस्तवराजादिकंनच॥७१॥न
होमंनक्रियायस्यधनरूणादिकंनहि॥कस्माद्घटितार्थंनेवमुक्त
स्त्वसर्वदाप्रिये॥७२॥अतःपरंनिरूपणंनास्तिनास्तिकदाचनः
संपुर्णंहिरामनामंच।आत्मारमोहदेमंः॥७३॥पंचाक्षरंजपे
त्पूर्वंमध्येरामंपदंस्मरेत्।अंतेपंचाक्षरंजप्त्वाशिवेनसमतां
व्रजेत्॥७४॥तत्पदंशिवरूपेणत्वंपदंजीवरूपिणं॥असिप
दंनरामाय।त्रयोरैक्यंनसंशयः॥७५॥एकोपिहमकर्तीजि च
र्णक्रियापुनर्नवा॥रूद्धिसिद्धिप्रदातारब्रह्मज्ञानंविशेषतः
॥७६॥कलाचतुष्टयंयातिशिवःसाक्षन्नसंशयः॥ज्ञात्वागुरु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मुरवाद्ब्रह्मब्रह्मैवाहं नसंशयः॥ १६॥ दिव्यौषधिरसरसायनधा
नुवादेहोरावि[illegible]रगारुडधन्ववादेतालंकखड्गघुटि
कांजनमंत्रवादेसिध्यंतित्यहरिशीवचनगवान्प्रसन्नः
॥ १७॥ इतिश्रिपद्मपुराणेरामतारकब्रह्मनिरूपणंनाम
ग्रथसमाप्तंसंपुर्णंशुभंशेषकृपादकृयोशुभं॥ ॥ल
खितंपंडछारामेणआत्मपढनार्थंउदिच्यटोलकिश्रा
गंगारामस्यपुत्रइछारामेणपरमार्थं॥ ॥श्रीगणपतिर्ज
यतुग्रंथरामतारकलक्ष्योछश्रीरस्तुकल्याणमस्तुशुभ
दहरेपदंचरेश्वरः व्यंजनवर्जितंतत्सर्वंक्षम्यतांदवप्रशिदपर
मेश्वरः॥ ॥ ॥